वारं, क्ली, (वार्य्यतेऽनेनेति । वृ + णिच् + घञ् ।) मदिरापात्रम् । इति हेमचन्द्रः ॥

वारंवारं, व्य, पुनःपुनः । यथा । वारंवारं मुहुः शश्वदिति शब्दरत्नावली ॥

वारः, पुं, ( वारयति व्रियते वेति । वृ + णिच् + अच् । वृ + घञ् वा । ) समूहः । अवसरः । इत्यमरः ॥ (यथा, महाभारते ।१।१६१।७ ।
"एकैकश्चापि पुरुषस्तत्प्रयच्छति भोजनम् ।
स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः ॥")
सूर्य्यादिवासरः । द्वारः । हरः । कुब्जवृक्षः । क्षणः । इति मेदिनी । रे, ६५ ॥ * ॥ अथ वाराणां संज्ञा ।
"चरः सौम्यो गुरुः क्षिप्रो मृदुः शुक्रो रविर्ध्रुवः ।
शनिश्च दारुणो ज्ञेयो भौम उग्रः शशी समः ॥
चरक्षिप्रैः प्रयातव्यं प्रवेष्टव्यं मृदुध्रुवैः ।
दारुणोग्रैश्च योद्धव्यं क्षत्रियैर्जयकाङ्क्षिभिः ॥
नृपाभिषेकोऽग्निकार्य्यं सूर्य्यवारे प्रशस्यते ।
सोमे तु लेपयागश्च कुर्य्याच्चैव गृहादिकम् ॥
सैनापत्यं शौर्य्ययुद्धं शस्त्राभ्यासः कुजे तथा ।
सिद्धिकार्य्यञ्च मन्त्रश्च यात्रा चैव बुधे स्मृता ॥
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ ।
कन्यादानं गजारोहः शुक्रे स्यात् सङ्गमः स्त्रियाः ।
स्थाप्यं गृहप्रवेशश्च गजबन्धः शनौ शुभः ॥"
इति गारुडे ६२ अध्यायः ॥
सावनदिनवद्वारप्रवृत्तिः सूर्य्योदयावधिरेव । सूर्य्यसिद्धान्ते ।
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिताः ॥"
अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनगणनोक्तं व्यवहारोऽपि तादृगेव । तिथिविवेकेऽपि । भवतु वारयोगे व्यस्ततिथेर्ग्रहणं तस्य दिनद्वयेऽसम्भवादित्युक्तम् । सावनदिनमाह सूर्य्यसिद्धान्तः ।
"उदयादोदयं भानोर्भौमसावनवासराः ॥"
भौमेति पित्र्यादिदिनव्यावृत्त्यर्थम् । यत्तु रेखापूर्व्वपरयोरित्यादिना ज्योतिषे वारप्रवृत्तिरुक्ता तज्ज्योतिःशास्त्रोक्तकालहोरादिज्ञापनार्थमिति ज्योतिस्तत्त्वे बहुधा विवृतम् ।
"नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः ।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥
येयैत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ॥"
इति विष्णुपुराणात् सूर्य्यदर्शनयोग्यकालादेव वारघटककर्म्मसु स एव कालः । इति ज्योतिस्तत्त्वम् ॥ * ॥ अथ शोभनवाराः ।
"रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वारा विख्याताः सर्व्वकर्म्मसु ॥
सितेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥"
इति ज्योतिःसागरः ॥
अथ वारवेला ।
"कृतसुनियमशरमङ्गल-
रामर्त्तुषु भास्करादियामार्द्धे ।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय ॥"
अथ कालवेला ।
"कालस्य वेला रवितः शराब्धि-
कालानलागाम्बुधयो गजेन्दू ।
दिने निशायाम्तुवेदनेत्र-
नगेषु रामा विधुदन्तिनौ च ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
तयोर्व्वर्ज्यत्वं यथा,—
"रवौ वर्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा ।
कुजे षष्ठद्वयञ्चैव बुधे बाणतृतीयकम् ॥
गुरौ सप्ताष्टकं चैव त्रिचत्वारि च भार्गवे ।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत् ॥ * ॥
रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ।
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्जयेत् ॥"
इति सारसंग्रहः ॥ * ॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम् ।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता ।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च ॥
वृहस्पतौ पतिः श्रीमान् शुक्रे पुत्त्रवती भवेत् ।
शनौ वन्ध्या तु विज्ञेया प्रथमस्त्री रजस्वला ॥"
इति मथुरेशकृतसारसंग्रहः ॥
( वालः । यथा, ऋग्वेदे । २ । ४ । ४ ।
"वियोभरिभ्रदोषधीषु जिह्वा
मत्यो न रथ्यो दोधवीति वारान् ॥"
"रथ्यो रथार्होऽत्योन वाजी यथा वारान् दंशवारणसाधनान् बालान् दोधवीति कम्पयति ।"
इति तद्भाष्ये सायणः ॥ वरणीये, त्रि, । यथा, ऋग्वेदे । १ । १२८ । ६ ।
"विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥"
"वारं सर्व्वैर्वरणीयम् ।" इति तद्भाष्ये सायणः ॥)

वारकं, क्ली, ( वारयतीति । वृ + णिच् + ण्वुल् । ) कष्टस्थानम् । इति हारावली । १२८ ॥ ह्रीवेरम् । इति हेमचन्द्रः । ४ । २२४ ॥

वारकः, पुं, ( वृ + णिच् + ण्वुल् । ) अश्वविशेषः । इति विश्वः ॥ अश्वगतिः । निषेधके, त्रि । इति मेदिनी । के, १३१ ॥ ( यथा, महाभारते ।१२। ३२१ । ३६ ।
"पुरा समूलबान्धवं प्रभुर्हरत्यदुःखवित् ।
तवेह जीवितं यमो न चास्ति तस्य वारकः ॥")

वारकी, [ न् ] पुं, ( वारकोऽस्यस्येति । इनिः । ) चित्राश्वः । शत्रुः । पर्णाजीवी । पयोधिः । इति मेदिनी । ने, १८५ ॥

वारकीरः, पुं, ( वारो वरणीयः कीरः पक्षीव । यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति । कॄ + कः । निरुक्तलक्षणो दीर्घः । यद्वा, वारे अवसरे कीलति बध्नाति कौतुकार्थं रज्वा प्रेम्णा वा । कील + कः । लस्य रत्वम् । ) श्यालकः । इति त्रिकाण्डशेषः ॥ वारग्राही । वाडवः । यूका । वेणिवेधिनी । नीराजितहयः । इति मेदिनी । रे, २८८ ॥

वारटः, पुं, पक्षी । इति त्रिकाण्डशेषः ॥

वारङ्गः, पुं, ( वारयतीति व्रियते इति वा । वृ + "वृञोऽङ्गच्च ।" उणा० १ । १२१ । इति अङ्गच् । धातोर्ह्रस्वः । ) खड्गादिमुष्टिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ मुट् इति बाँट इति च भाषा ॥ ( यथा, सुश्रुते । २ । ७ ।
"तत्र स्वस्तिकयन्त्राणि * * * * मत्र्येऽङ्कुशवदावृत्तवारङ्गाणि अस्थिविलग्नशल्योद्धरणार्थमुपदिश्यन्ते ॥" )

वारटं, क्ली, ( वार् जलमटति प्राप्नोतीति । अट् + अच् । ) क्षेत्रम् । इति त्रिकाण्डशेषः । क्षेत्रसमूहः । इति शब्दरत्नावली ॥

वारटा, स्त्री, ( वारि जले अटतीति । अट् + अच् + टाप् ।) हंसी । इति हेमचन्द्रः ।४।३८३॥

वारणं, क्ली, (वृ + णिच् + ल्युट् ।) प्रतिषेधः । इति मेदिनी । णे, ६६ ॥ (यथा, हरिवंशे ।१८०।४५॥
"अस्त्राणां वारणार्थाय वासुदेवोऽप्यमुञ्चत ॥")
हस्तवारणम् । इति जटाधरः ॥*॥ दानकाले वारणनिषेधो यथा,—
"न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत् ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥

वारणः, पुं, ( वारयति परबलमिति । वृ + ल्युः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ ( यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")
वाणवारः । इति शब्दरत्नावली ॥ ( यथा, महाभारते । ४ । ४० । २ ।
"वारणा यस्य सौवर्णाः पृष्ठे भासन्ति दंशिताः ।
सुपार्श्वं सुग्रहञ्चैव कस्यैतद्धनुरुत्तमम् ॥"
वारि जले रणति चरतीति । वार् + रण + अच् । जलजाते, त्रि । यथा, हरिवंशे ।३१।४८।
"ततो वैभाण्डकिस्तस्य वारणं शक्रदारणम् ।
अवतारयामास मही मन्त्रैर्वाहनमुत्तमम् ॥"
"वारि जले रणति चरतीति वारणः समुद्रोद्भव इत्यर्थः ।" इति तट्टीकायां नीलकण्ठः ॥)

वारणबुषा, स्त्री, ( बुष्यते इति । बुष उत्सर्गे + कः । वारणानां बुषा । यद्वा, वारणान् पुष्णातीति । पुष + कः । पृषोदरादित्वात् पस्य वः ।) कदली । इत्यमरः । २ । ४ । ११३ ॥

वारणवल्लभा, स्त्री, ( वारणानां वल्लभा प्रिया । ) कदलीवृक्षः । इति त्रिकाण्डशेषः ॥

वारणसी, स्त्री, ( वरणा च असी च नदीद्वयं तस्य अदूरे भवा । "अदूरभवश्च ।" ४।२।७० । इत्यण् । ङीप् । पृषोदरादित्वात् साधुः । ) वाराणसी । काशी । इति हेमचन्द्रः ॥

वारणीयं, त्रि, (वृ + णिच् + अनीयर् । ) वारणयोग्यम् । वृञ्धातोः ण्यन्तादनीयप्रत्ययेन निष्पन्नम् ॥ ( यथा, कथासरित्सागरे ।५७।१।